[illegible]

ॐ श्रीः

सार्थ वेदविद्या

सार्थवेदविद्यया समस्तानन्दवेद्यया शास्त्रसिद्धया सम्मानेन गद्यया
दैवतेन्द्रसिद्धया ऽऽसम्मानितदस्तु वृद्धया दैवरामदृष्टया सुवेदवाङ्निबद्धया ऽस्य

विदितमस्तु तत्र भवताम् - यदिह प्रपञ्चे परिदृश्यमानो यो मोक्षसुखे सदा श्रेयः-
शालिनीं मनुष्यजातिमधिकृत्य सदसद्विवेकं प्रकटयितुं वेदशासनं सम्प्रवृत्तं
प्रवृत्तं वेदशासनमनुसृत्य पूर्व महर्षयः सांदृष्टमेव स्वातन्त्र्यं शाश्वतं स्वानन्दपद
मक्षयममृतत्वं च प्रापुरिति सुप्रसिद्धम्। तदिदानीमपि तादृशमेव पदमाप्तुं शक्य
मिति प्राच्यां सिद्धान्तः, तदिदं नैतिकशिक्षणपरानुविनीतानां आधुनिकानां पाश्चात्य-
विपश्चितामपि अनुभवविरुद्धमिति निर्विवादमभ्युपगन्तव्यं भवति।-
तदिह बाल्यवयसि कोमले चेतस्येव समुपलब्धं वैदिकं लौकिकं नैतिकं च
साहित्यशिक्षणं सदाचरणं मम प्रत्यक्षं सद्यः फलप्रापकमेव भवितुमर्हतीति.
वस्तु सिद्धं तत्त्वम्.

अस्मिँल्लोके मानवानां बहुधा ऽऽर्तिमस्ति प्राप्यम् - तत्सर्वमपि वेदशासनेनैव
प्राप्यमिति औपनिषदम् अनुशासनमनुश्रूयते. "ये ये कामा दुर्लभा मर्त्यलोके
सर्वान् कामाँश्छन्दतः प्रार्थयस्व" इति नचिकेतसं यमेनोपदिष्टम्. (कठो. १.१.२५
तथा च मनुः - कामात्मता न प्रशस्ता न चैवेहास्त्यकामता। काम्यो हि वेदाधिगमः
कर्मयोगश्च वैदिकः॥ इति, तस्यायमर्थः - वस्तुतः कामनानुयुक्ता
आशा हि परमं दुःखं नैराश्यं परमं सुखम्" इति तदुपदेशात्.
तथा निराशया अवस्थातुं जीवितुमपि अशक्यमेव, अस्मिन् विषमे प्रसङ्गे
इति कर्तव्यतामूढानां कृते इदं मार्गदर्शनम्. "काम्यो हि वेदाधिगमः" इति
वेदानुशासनमेव काम्यम् तदनुशासनेनैव अनुवर्तितव्यमिति, तादृशः निष्काम
कर्मयोगस्तु वैदिक एव, भवितुमर्हतीति नान्यः. "कुर्वन्नेवेह कर्माणि जिजीविषे
च्छतं समाः" इत्युपदेशात्, (ईशो. २)
तदर्थं वेदविद्यैव अस्माकं सर्वथा शरणमिति प्रतीयते,

अत्रायं कश्चिद् वस्तुतत्त्वविमर्श प्रसङ्गः;
विद्यावलम्बने तत्फलप्राप्तौ च तत्प्रतिद्वन्द्वी अविद्याऽपि काचित्
तत्प्रतिबन्धकारिणी भवतीति प्रतिपदमनुभूयते सर्वैः।
तथा च अनुश्रूयते- सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी
पस्पृधाते। तयोर्यत् सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत्
(ऋ. मं ७। ।१) इति मैत्रावरुणिवसिष्ठस्य मन्त्रदर्शनम्।

तथा च अनुश्रूयते
दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता॥
विद्याभीप्सिनं नचिकेतसं मन्ये न त्वा कामा बहवोऽलोलुपन्त॥ इति-
(कठो. १।२।४)

या याच ज्ञाता
अत्र अविद्या-विद्या इति ज्ञायते ते एते परस्परं विपरीते
विषमस्वरूपे च सत्यौ दूरत एव परिवर्तेते इति, तत्र नचिकेतसं
एनं विद्याकामं जानामि, कुतः बहवः कामाः त्वां नैव
अलोलुपन्त लोभग्रस्तं न चक्रुः॥
विपरीते अपि एते परस्परं सहकारिण्यौ भवतः,
विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा
विद्ययाऽमृतमश्नुते॥(ईशो. ११) अत्र अविद्या- अज्ञानं, विद्या तु ज्ञानम्
"विद्यया विन्दतेऽमृतम्- इति च-
एवमेव "अधर्मोऽपि जिज्ञास्यः परिहाराय" इति शां.शा.भाष्यम्.
सा: २४
अविद्यैव- अधर्मस्यापि ज्ञानमावश्यकमेव, ततो निवृत्त्यर्थमिति
अस्मिन्नर्थे. कुत्सस्य ऋङ्मन्त्रदर्शनम्-
द्वे विरूपे चरतः स्वर्थे अन्यान्या वत्समुप धापयेते
हरिरन्यस्यां भवति स्वधावाञ्छुक्रो अन्यस्यां ददृशे सुवर्चाः
(ऋ. मं. १। ।१)
अस्यायमर्थः, सर्वस्यापि जगतः सु-अर्थे सुष्ठु पालप्रयोजने कल्याणार्थे
द्वे- विरूपे विरुद्धरूपे संचरतः- ते च अन्योऽन्यं वत्सं अन्योऽन्यतः

जीवजातं - उत्पादयेत स्वकीयेन रसप्रदानेन तर्पयतः, अन्यस्यां एकस्यां
हरिः हरणशीलः स्वधावान् - अन्नवान् अन्नवांश्च भवति -
इतरस्यां अन्यस्यां शुक्रः भास्वान् ~~प्रकाशते~~ ददृशे दृश्यते प्रकाशते
इति तदर्थः। सांकेतिका ज्ञाता शब्दाः सांकेतिकाश्च तदर्थाः,
नक्तोषसौ - उषासानक्तौ, अहोरात्रे च भवतः -
अधिदैवततत्त्वे - ~~नक्तोषासा वर्णमामे~~ हरिः हरणशीलो वरुणः
शुक्रः - ~~सूर्यः~~, मित्रः - तौ मित्रावरुणौ भवतः -
वस्तुतः ते उभे अपि भ्रातरौ एकमेव वत्सं धापयेते असावेव सूर्यः -
नक्तोषासा वर्णमामेम्याने धापयेते शिशुमेकं समीची। इति
तदनुश्रुतिः। (ऋ० मं० १।   )
अधिविद्यतत्त्वेन - ते द्वे शक्ती विद्या। अविद्या इति प्रतीयते
तयोरपि विपरीतस्वरूपत्वात्। ते च पृथक् पृथक् पुरुष आश्रयेते।
क्वचिदेकमेव इति भावः।

२.

एतत्तत्त्वविमर्शनं च भवति -
सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते।
तयोर्यत् सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत्॥ ऋ० मं० ७। १९)
अस्यायमर्थः - सुविज्ञानं अनुभूतिं चिकितुषे ज्ञातुं इच्छवे जिज्ञासवे
जनाय - सच्च - असच्च वचसी तदनु सदसदर्थजातं च स्पर्धयित्वे:
विजयार्थं स्पर्धयतः, तयोः सदसतोः वचसोः तदर्थयोश्च यत् खलु सत्यं
वास्तवं सत्स्वरूपं यतरत् - यच्च ऋजीयः अत्यन्तं ऋजुतरं तदेव
सोमः सनसोऽध्यक्षः अवति संशोधनेन रक्षति असत् अप्रान्ते
निवारयति।
एतद्विमर्शनप्रक्रिया च मन्त्रान्तरे अनुश्रूयते - सक्तुमिव तितउना
पुनन्तः यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते
भद्रैषां लक्ष्मीर्निहिताधि वाचि॥ इति - (ऋ० मं० १०।   २)

२

तितउना चालन्या सक्तुमिव मनसा वाचं पुनन्तः परि-
शोधयन्तः यत्र यस्मिन् विषये- अर्थे अक्रत उच्चरन्ति।
अत्र सखायः समानभाषाज्ञानिनः- सख्यानि सखिप्रोक्तानि
जानन्ति। एषां वाचि भद्रा मंगलप्रदा सत्य तत्त्वार्थप्रदा लक्ष्मी
सत्त्व लक्षणसम्पन्ना ज्ञानरूपा श्रीः प्रतितिष्ठति।
"सत्यं यथार्थं वाङ्मनसे" इति व्यास योगसूत्र भाष्ये स्पष्टम्.
सैषा लक्ष्मीश्रीदेवता-त्रयीविद्यात्मिका इति श्रूयते.
अहे बुध्निय मन्त्रं मे गोपाय, यमृषयस्त्रयीविदा विदुः
ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम्

—

सैषा त्रयी विद्या ऋक् सामयजुः स्वरूपसंवेद्या,
सर्वहुतो यज्ञात् तस्मात्:-
प्रागेव ~~विश्व~~ सृष्टेः परमपुरुषस्य ब्रह्मणः प्रादुर्भूता.
"तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद् यजुस्तस्मादजायत।" इति.
(ऋ. मं. १०।९०।९)

—

त्रयो वेदास्त्रयस्त्रयी इति ते त्रयः वेदनाम्ना प्रसिद्धाः प
~~[illegible]~~ तस्यैव सार्थस्य वेदस्य तद्- विद्यायाश्च मीमांसा प्रारभ्यते.
किं तावद् वेदस्य वेदत्वं स्वरूपं तत्त्वम्, ~~[illegible]~~ वैशिष्ट्यम्.
तद्व्याख्यायाश्च महत्त्वम् - इति जिज्ञासास्पदम्.

—

"अथातो ब्रह्मजिज्ञासा, जन्माद्यस्य यतः, शास्त्रयोनित्वात्"
इत्यत्र आचार्येन्द्रस्य शारीरकं भाष्यम् - "जगत्कारणत्वप्रदर्शनेन
सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्, तदेव द्रढयन्नाह "शास्त्रयोनित्वात्" इति
महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य
प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म।

—

अस्यार्थः- महान् अयं व्यापकः इति शासनात्मकः ऋग्वेदादिः छन्दोनि-
ब्राह्मणादि
बन्धनरूपः मन्त्ररूपः सर्वविद्याश्रयीभूतः प्रदीपवत्स्वातन्त्र्येण सर्वार्थप्रकाशकः,
सर्वज्ञकल्पः, तस्यास्य वेदस्य मूलकारणं परं ब्रह्मेति,

तस्य स्वरूपं तत्त्वं समर्थयति- त्रिभुवनस्य अनेकशाखाभेदभिन्नस्य देवतिर्यङ्मनुष्य-
वर्णाश्रमादिप्रविभागहेतोः ऋग्वेदाद्यास्य सर्वज्ञास्य सर्वविदः सर्वशक्तेः- पुरुष
निःश्वासवद् यस्मात् महतो भूताद्योनेः संभवः इति। अस्य महतो भूतस्य निःश्वसित
मेतद् ऋग्वेदो यजुर्वेदः सामवेदः इति- इति प्रथमं वर्णकम्-

द्वितीयोऽर्थः-
~~अथवा~~ अतएव सोऽयं वेद एव परब्रह्मात्मनः ज्ञाने प्रत्यक्षं प्रमाणमिति उक्तम्।
अथवा यथोक्तः ऋग्वेदादिशास्त्रं योनिः कारणं ब्रह्मणो यथावत् स्वरूपाधिगमे,
शास्त्रादेव प्रमाणाज्जगतो जन्मादि कारणं ब्रह्माधिगम्यते इत्यभिप्रायः
अत्र परब्रह्मणः परोक्षत्वं — वेदस्य प्रत्यक्षत्वं, तस्मात् परोक्षवस्तुनि वेद एव
प्रत्यक्षं प्रमाणं भवितुमर्हतीति- भावः।

"यावद् ब्रह्म विष्ठितं तावती वाक्" इति ऋक्पादोऽत्र प्रमाणम्-(१०। ।
"यत्र क्व च ब्रह्म तद्वाक् यत्र वा वाक् तद्वा ब्रह्मेत्येतदुक्तं भवति" इति च ब्राह्मणा
नुवचनम्-(ऐ. आ.)

वागर्थाविव संपृक्तौ इति वेत् वाच्यवाचकयोः स्वयोर्नाम-ब्रह्मणोः
तादात्म्यं स्वतः सिद्धम् इति

वेदत्वं
तदेतदेव वेदस्य स्वरूपं माहात्म्यं वैशिष्ट्यं च भवतीति

प्रत्यक्षसिद्धस्य अपरोक्षाणां परोक्षाणां
अत्र केचिदेवमाक्षिपन्ति- सर्वस्यापि जगतः जीवात्मनां देवानामपि
नामरूपात्मकानां समानसत्त्वात्- कुतः अकस्मात् परब्रह्मण्येव स वेदः
प्रत्यक्षं प्रमाणमिति सङ्गच्छते इति। अत्रोच्यते- नामरूपाभ्यां साकृतस्य
प्रत्यक्षस्य जगतो जीवात्मनः देवादीनां च प्रत्यक्षानुमानशब्दादिप्रमाणगम्यत्वं समान
मेति निर्विवादम्। केवलस्य चेतनात्मनः सत्यादिलक्षणस्य परब्रह्मणः परमात्मनः
परमपुरुषस्य तस्य प्रत्यक्षादिप्रमाणगम्यत्वं नास्त्येव, तस्य शब्द-रूपादिबाह्यलिंगाभावात्
शब्दप्रमाणगम्यत्वेऽपि न तु लौकिकैः शब्दैः स्पष्टवगन्तुं शक्यते, इति तयोः परत्वात्
अन्यत्र तयोः ब्रह्मणा चेतनात्मनश्च सङ्गति महदन्तराभावात्

नहि ब्रह्मादिनामवाच्यं वस्तु किञ्चिदिह प्रत्यक्षं दृश्यते, सर्वसाक्षिणः केवलस्य चेतनात्मनः सर्वद्रष्टुः स्वरूपं दृश्यरूपेण द्रष्टुं कस्यचित् अशक्यत्वात्। सुसन्दर्शं भावं प्रतिपश्येम [illegible] ब्रह्मणः। पुनः यदि तावद् "सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादीनि वेदवचनानि नाभविष्यन् तर्हि तत् परोक्षसिद्धं सत्यं वस्तु ज्ञातुमपि अशक्यमेवाभविष्यत्। तस्मात् वेदैकगम्यत्वं ब्रह्मण इति सर्ववेदसिद्धान्तः।

अत एव "नावेदविन्मनुते तं बृहन्तम्"।

तदेतदेव वेदस्य वेदत्वं वैदिकत्वं चेति प्रतिज्ञायते।

सामान्येन तु प्रत्यक्षपरोक्षापरोक्षसिद्धानां जगदीशजीवात्मनां स्वरूपबोधसामर्थ्यं नैसर्गिकवस्तुसिद्धमेवेत्यपि सङ्गच्छते,

2

सोऽयं वेदः सर्गेऽस्मिन् विश्वसृष्टेः परस्मिन् ब्रह्मात्मनि चेतनात्मत्वेन विद्यमानः स्वात्मानं संवित्ते, तदेव तद्विज्ञानशक्तिरूपपरावागपि- तेनैव ब्रह्मात्मना संवित्ते तदेव प्रथमं श्रोतुमर्हं परमं वेदत्वम्- वागाम्भृणी ब्रह्मणा संविदाना- वागेव अहमिति ब्रह्मणा संवित्ते इति च औपनिषदं वचनम्।

स एव (पर) ब्रह्मणः समाश्रयात् प्रादुर्भूतः सन् सर्ववस्तुबोधार्थं स्वयं प्रकाशते सर्वैः वेद्यते, स मन्त्रद्रष्टॄ(स्या) आत्मनि प्रपश्यत्येव केवलं तल्पेऽपि- स्वयं न विलीयते न विनश्यति नामशेषतामुपयाति- वाचकशब्दशक्तिरूपेण वाच्यनाम्नैव प्रकाशिष्यते ब्रह्मात्मसत्तया इति यावत्। तस्य वेदस्य तदेव सर्वस्य कल्पत्वम्। (प्राग्वत्)

अतः पुनः ब्रह्मणा निःश्वसितः सन् प्रादुर्भवति- विश्वसृष्टेः रिति श्रूयते अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा। आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥ तदीयवेदात्मिकया वाचैव विश्वसर्जनमिति इहापि श्रूयते। सपूर्वया निविदा कव्यतायोरिमाः प्रजा अजनयन् मनूनाम्॥ सः अङ्गिरसः परमचेतनः आत्मा पूर्वया प्रथमया निविदा

व्याख्या - इमाः मनूनां मानवान्ताः प्रजाः अजनयत् । प्रादुर्भावयामास,
तां वेदादिकां वाचं ऋषयः सम्पन्ना ददृशुः
युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः । लेभिरे तपसा पूर्वं
मनुज्ञाताः स्वयम्भुवा, इति स्पष्टोऽर्थः

२

वेदः

वेद इति शब्दस्य अनेकरूपत्व मनेकार्थत्वे गम्यमानेऽपि वस्तुतः
मूलतः एकार्थत्व मेकरूपत्वमेव - व्युत्पत्तियोगात् इति उन्नीयते -
वेत्ति विद्यते इति वेदः विद् ज्ञाने, विद् सत्तायाम् -
तथा - जातवेदाः - इति शब्द सारस्याने यास्कः आह -
जातानि ज्ञातानि वेत्तीति जातवेदाः जाते जाते विद्यते इति जातवेदाः -

विन्दते - विद्लृ लाभे -
एवमेव प्रेरणार्थे णिजन्तेऽपि स्मानात् वेदयति, विन्दयति इत्यादि
जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः"
यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये" इत्यादिषु मन्त्रवर्णेषु
वेदशब्दस्य ज्ञानार्थत्वेन छन्दः स्वरूपत्वेन च दर्शनात् -
वित्ते विद्यते इति आत्मनेपद प्रयोगे आत्मैक ज्ञान - सत्तादि योगसम्बन्धः
प्रतीयते - आत्मनेपद प्रयोगशक्तेः, वागर्थौ ब्रह्मणा संविदाना इति च -
वेद - वेत्ति वेदयति इत्यादौ तु परस्मैपद प्रयोगात् अन्यतरवस्तुसम्बन्धः संविदे
गम्यते - "वेदमासो धृतव्रतो द्वादश प्रजावतः । वेदाय उपजायते,
वेदवातस्य वर्तनिमुरोर्ऋष्वस्य बृहतः वेदाये अध्यासते -
वेद नामानि गुह्यानि इत्यादिक उदाहरणात् -
(यथा आह आचार्येन्द्रः अस्मदपि सविता प्रकाशते
इति उपचारदर्शनात्)
केवलेन स्वेन
तदेव स्वयमेव संविद्यो स्वयमेव विद्यते केवलया सत्तया
तु स्वतः
सः वेद शब्द प्रत्यय संवेद्यः इति विशेषः -

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
पश्चिमकेन सन्नु क्रतुः - इतिच अत्र मन्त्रे पदप्रयोगे आद्यैक
सम्बन्ध दर्शनात्

सविता सर्वं प्रकाशयति इति इति स सर्वज्ञः सर्वविद्येशानः
सर्वज्ञकल्पो वेदस्य सर्वं वेदयति इति उभयथापि सङ्गच्छते।
यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तदेतन्मन्त्र उपकारकं
विद्वान् ब्रह्मकृतोपमन्द - (मुं. उ)

विन्दते इति च लाभार्थके तु सर्वं समानम् -
विद्यते विन्दते इतम् -

सार्थः वेदः

अर्थेन सहितः सार्थः
'' यावद् ब्रह्म विष्ठितं तावती वाक् '' इति वाग्ब्रह्मणोः
समानता ह्यनुश्रूयते।
वाग्रूपो मंत्रात्मको वेदः छन्दोनिबन्धनक्रमः प्रसिद्धब्रह्मरूपः
ब्रह्मशब्देनैव मंत्रवर्णेषु अनुश्रुतः श्रूयते -
ब्रह्माणि मन्दन् गृणतामृषीणाम् - ब्रह्मणा ब्रह्मणस्पते -
अत्राह वशिष्ठोऽसौ तिवाजो विश्वे वाचि ज्ञानि ब्रह्मणा दासि,
ब्रह्मणा ते ब्रह्म युजा युनज्मि '' इत्यादि।
अत एव तयोः समानरूपत्वेन साहित्यैव ग्रहणं युज्यते
'' यस्तित्याज सचिविदं सखायं न तस्य वाच्यपि भागो अस्ति
यदीं शृणोत्यलकं शृणोति नहि प्रवेद सुकृतस्य पन्थाम् -
अर्थस्य परित्यागेन वाङ्मात्रस्य ग्रहणे वृथा स्यात्
एषा च खलु न वेद सुकृतस्य स्वीकरणस्य मार्गं न वेद इति -
वागर्थयोः सम्प्रयोगेण ग्रहणमेव सम्पत्तीकरणमिति भावः,
अत एव उपदिष्टम् - ऋचो अक्षरे परमे व्योमन् यस्मिन्
देवा अधि विश्वे निषेदुः। यस्तन्न वेद किमृचा करिष्यति
य इत् तद्विदुस्त इमे समासते। इति

अर्थस्वरूपवस्तुज्ञानमन्तरेण केवलं वाग्रूपाणां वचसां ग्रहणं
निरर्थकमेवेति भावः। तथा तदर्थज्ञानमेव सार्थकतामुपैतीति च
उपदिश्यते।

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा। इति
इत्यर्थज्ञप्रशंसा इति यास्कनिरुक्ते स्पष्टमेव।

इति सर्वं स्वीकृत्य अनुवदन्ति संस्तौति कवीन्द्रः

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये जगतः पितरौ वन्दे
पार्वतीपरमेश्वरौ॥

अत्र पार्वतीपरमेश्वरयोर्दम्पत्योः तादात्म्ययोगेन वागर्थयोः
~~साहचर्यं~~ सातत्यं च प्रतिपत्तिं च दर्शयन् तौ ~~...~~ वन्दते। उभौ
वादयते च। एतेन वाच्यरूपस्य वेदस्य अर्थज्ञानसाहित्यमा-
वश्यकतया निर्दिष्टं गम्यते।

आगमविदश्चाहुः - भगवान् पतञ्जलिर्महाभाष्ये - तस्माद् ब्राह्मणेन
निष्कारणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च इति परं सम्पन्नम्।

२

अस्मिन्नर्थे केचिदेवं विवदन्ति - अर्थज्ञानाभावमात्रेण कथमिव
शब्दशास्त्रविद्भिः ख्यायते कथं च अधीतो वेदः निरर्थको भवेत्।
स ब्रह्मस्वरूपेण प्रसिद्धमनुश्रूयमाणः अकस्मात् अनर्थकः
इति कथं वक्तुं शक्यम् - इति च जिज्ञास्यास्पदमेवेति।

अत्रोच्यते - अर्थज्ञानाभावेऽपि सम्यगधीतो वेदो ~~न~~ सर्वथा
न निरर्थको भवितुमर्हति, तस्य मन्त्रब्राह्मणरूपत्वात् साक्षात्
कार्यकारित्वे फलप्रदकत्वे च साधनीभूतत्वात्।

अमन्यमानाँ अभि मन्यमानैर्निर्ब्रह्मभिरधमो दस्युमिन्द्र
हे इन्द्र त्वं अमन्यमानान् अर्थज्ञानरहितान् - अभिमन्यमानैः
स्वकीयत्वेन भावयद्भिः ब्रह्मभिः मन्त्रैः दस्युं विघातकं निरधमः -
न्यवारयः ~~~~ निरसारयश्च इति भावः।

सर्वे वेदा यत्पद ओमित्येतत्. इति सर्वेषां वेदानां बीज-
भूतं प्रणवाक्षरं ब्रह्मस्वरूपतया कार्यं
।।तत्प्रतिपादकत्वेनोक्तम्- आत्मत्वेनापि ह्युपदिष्टम्

२

तस्मात् मन्त्रावृत्तिरूपेण जपयज्ञेन तस्य प्रत्यक्षं फलं स्वय-
मेव समर्थमन्त्र एव साधयितुमर्हति।

।।एतेन. तदर्थज्ञानोदयायैव तन्मन्त्रावलम्बनमेव
अर्थज्ञानाभावेऽपि। सार्थकतां सम्पादयतीति सर्व शास्त्र
सिद्धान्तैर्निर्णीतोऽर्थः-

अज्ञात वेदसे सुनवाम सोममरातीयतो निदहाति वेदः.
~~सर्वेद्यः अराती~~ जातवेदसे सर्वज्ञाय अग्नये सोमं
वयं- सुनवाम, सोमं मन्त्रः सम्पद्यताम्- सः- वेदः- अरातीयतः
अस्माकं शत्रूयतः दुष्टान् हिंसकान् निदहाति. इति-
अस्य ह कार्यकारित्वम्- वेदस्य अनुस्मर्यते.

तथा. यः समिधा य आहुती. यो वेदेन ददाश मर्तो अग्नये
यो नमसा स्वध्वरः तस्येदर्वन्तो रंहयन्त आशवस्तस्य
द्युम्नितमं यशः न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत्
इति वेदेन. वेदसाधितेन यज्ञादिना. सर्वपापादिनिवृत्तिः
दिव्ययशःप्राप्तिः च सम्पद्यते इति. वेदत्वेनैव. प्रतिज्ञातम्.
उपपद्यते।

२

वेदविद्या

समानार्थके

वेदः विद्या - इति शब्दद्वयं ह्येकार्थकमेव, समानधात्वर्थयोगात्
वेदशब्दवत् विद्याशब्दोऽपि विद्धातोः विदि धातोश्च अर्थेनैव
सिद्धः,

वेदशब्दस्तु प्रत्यक्ष-परोक्ष-अपरोक्षाणां जगद्-ईश-जीवात्मनां सर्वेषां
वस्तूनां सत्यां वेदे शास्त्रे प्रवृत्तः शब्दशास्त्ररूपः प्रत्यक्षप्रमाणात्मकः,
विद्या ~~तु~~ शास्त्रविधानानुसारेण प्रत्यक्षतः तदाचरणेन प्रक्रियारूपेण
ज्ञातुं अनुष्ठातुं उपयुक्ता प्रवृत्तिरूपा ईश्वरेणैव निरोधा आन्तर्या आध्यात्मिकी.

एतद्व्याख्यानुशिष्टस्याऽऽहृत - विद्याभ्यासेनापि केतसंपदः
विद्ययाऽमृतमश्नुते. विद्यया विन्दतेऽमृतम्. इत्यादिषु प्रत्यक्षतः फलप्राप्ति
साधनरूपेण विद्यायाः सन्निदर्शनं सङ्गच्छते.

अपि च "पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥ इति विद्यानां धर्मस्य च
आश्रयीभूतत्वेन वेदादीनां निदर्शनात् तदेतदेव सिध्यति,

तथा महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य, इत्यत्रापि-
वेदविद्ययोः प्रमाणप्रमेयात्मकता प्रतीयते,

॥ सार्थो वेदः ॥ (तत्त्रयम्)—

स च वेदार्थः त्रिविधः तत्त्रयस्य योगात् "त्रयोऽर्थाः सर्ववेदानाम्"
इति वचनात्, तथा च यास्कनिरुक्तम् - त्रिविधा हि स्तुतयो भवन्ति
प्रत्यक्षकृताः परोक्षकृताः आध्यात्मिक्यः" इति - अत्र आध्यात्मिकाः
अपरोक्षकृताः". प्रत्यक्षं आधिभौतिकम्. परोक्षम् आधिदैविकम्
अपरोक्षम् आध्यात्मिकम् ॥ तदेते त्रयः अर्थाः पृथक् पृथक् भिन्नेषु
वेदमन्त्रेषु विद्यन्ते इति केषांचिन्मतम्. ~~त्रयो~~ सर्ववेदानाम् इति वचनात्
प्रत्येकस्मिन् मन्त्रे सर्वेष्वपि मन्त्रेषु त्रयः अर्थाः विद्यन्ते इति बहुमतम्.
एतेषु त्रिष्वपि अनुस्यूतः तुरीयः परोवरीयान् परमः अर्थः,
तथा केवलं शब्दः शब्दार्थः पञ्चमः, तत्र धात्वर्थयोगेन शब्द
स्वरूपज्ञानम्. तद्युक्तेः तदर्थस्वरूपज्ञानं सम्पादनीयम्-
तदिदं शब्दार्थज्ञानमेव मूलं अन्येषां चतुर्णामपि अर्थानां ज्ञाने कारणम्-
एवं पञ्चविधो वेदार्थः इति दैवरातीयं मतम्-
तदिदं वेदार्थकल्पलतायां साक्षात्कारयोगसुधायां च स्पष्टं समर्थितम्-
कल्पलतायां तु - "अयं सा शिङ्क्ते येन गौरभीवृता" इति मन्त्रस्य
तादृशं व्याख्यानं श्लोकबद्धं विद्यते.

श्लोकः - योगसुधायाम् -

स्तुतिष्वपि सिद्धं वस्तु तत्त्वम्-

वेदमन्त्रेषु केवलं देवतास्तुतिरेव विद्यते इति बाह्यया शब्ददृशा
प्रतीयते, तथापि तत्र वस्तुतत्त्वं स्वतः सिद्धमन्तर्हितमेवेति
निश्चीयते - तद्यथा - अप्सु मे सोमो अ-
मे मह्यं सोमः अब्रवीत्. अप्सु अन्तः विश्वानि भेषजानि (~~सन्ति~~)
विद्यमानानि प्राह, तथा विश्वमंगलकारकं अग्निंच अब्रवीत्.
तस्मात् ता आपः विश्वभेषजीः सर्वौषधिरूपाः प्राह इति.
आस्वन्तरमृतमप्सु भेषजं अपामुत प्रशस्तये देवा भवत वाजिनः इति,
इति स्पष्टोऽर्थः -

(१) तत्त्वत्रयस्य सामूहिकम्

तत्त्वत्रयमनुक्ते।

एतस्मिन्नर्थे - ऋङ्मन्त्राएव प्रमाणम् -

वर्तमानं ~~जगत्~~ दृश्यमानं

पुरुष एवेदं सर्वं - इदं सर्वं भूतं भव्यं च जगत् - पुरुष एव, एतेषु अनुस्यूतः

तत् सृष्ट्वा तदेवानुप्राविशत् इति वचनात्,

उत अमृतत्वस्य ईशानः ईशोऽपि पुरुष एव, यदन्नेन अन्नादिना अतिरोहति - ~~जीवे~~ पुरुषरूपेण जीवात्मना आविर्भवति सोऽपि पुरुष एव।

अव्ययः सम्भूतः - तत्पुरुषस्य विश्वमाजातम् - तस्य सत्यस्य देवत्वम्।

अन्नात् पुरुषः - इति च

न तं विदाथ य इमा जजानान्यद्युष्माकमन्तरं बभूव। इति मन्त्रवर्णात्।

अत्र जगद् ईश जीवात्मनां पुरुषात्मता अनुश्रूयते स एव तुरीयः परमात्मा।

उत्तमः पुरुषः उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः -

एतस्मिन्नर्थे मन्त्रान्तरं स्पष्टार्थबोधकम् भवति। प्रत्यङ् देवानां विशः - देवानां परोक्षसिद्धानां विशः प्रजाः प्रति प्रत्यङ् अन्तःस्थितः मानुषान् प्रति प्रत्यङ् प्रत्यगात्मस्वरूपः सन् उदेषि, विश्वं भूतं प्रति स्वः दृशेऽहं साक्षात् सवितृरूपेण उदेषि, इति त्रयाणां भूत-देव मनुष्याणां - प्रत्यगात्मा एकरूपः समर्थ्यते

तत्र दृष्टान्तः प्रत्यक्षसिद्धः: (१) अयं सूर्यः प्रत्यक्षः आधिभौतिको ज्योतिर्मयः;

सूर्यान्तर्यामी देवतात्मा आधिदैवतः - "यः आदित्ये तिष्ठन् आदित्यमन्तरो यमयति यं आदित्यो न वेद, यस्य आदित्यः शरीरम् इति परोक्षसिद्धः सूर्यः देवतात्मा - इति गम्यते।" "योऽसावादित्ये पुरुषः सोऽसावहम्" इति स्पष्टोऽर्थः

अस्माकं चक्षुरन्तर्गतः अपरोक्षसिद्धः।

चक्षोः सूर्यो अजायत। आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत्।

एवं आत्मनो वा आदित्यः त्रेधा वृत्तिर्विततः -

सुसन्दृशं त्वा वयं हे सूर्य वयं त्वां सुसन्दृशं द्रष्टारं प्रति पश्येम प्रत्यक्ष त्वमेव द्रष्टा इति मन्महे, नृचक्षसः मानवदृशः पराग्दृश्यस्य विषयत्वेन विशेषतः प्रत्यक्षं दृश्यस्वरूपं ज्योतिर्मयं पश्यामः - आदित्य~~तेजो~~ तेजोमयेन प्रत्यक्षेण अनेन चक्षुषा आत्मनः इति अस्य जीवात्मनोऽपि द्रष्टृस्वरूपत्वम् प्रतीयते।

+ विहितस्याननुष्ठानात्
+ अकुर्वन्विहितं कर्म-

उद्वयंतमसस्परि—

तमसः अन्धकारात् अज्ञानात् परतः उदः आदित्ये दिव्यं

ज्योतिः साक्षात् पश्यन्तः सन्तः, ~~आदि~~ तं परोक्षसिद्धं

सूर्यं उत्तमं ज्योतिःस्वरूपं ~~प्रस्ते~~ अगन्म प्राप्नुमः इति·

इतिप्रत्ययादि (तत्त्वा) अर्थेषु अनुस्यूतम्- एकमेवपरं वस्तु

वस्तुभूतं तत्त्वम्-

(विधिनिषेधवस्तुतत्त्वोपदेशाः)

२ ॥ प्रवृत्तिनिवृत्तिविधार्थकाः ॥ (सर्वाणि शास्त्राणि)

(प्रथमः) तत्र शास्त्रविहितेषु सत्कर्मसु नियता प्रवृत्तिः, असत्कर्मभ्यः निषिद्धेभ्यः-

दुष्टविषयेभ्यो निवृत्तिः, द्वितीयः, केवलं वस्तुतत्त्वोपदेशेन निर्दिष्टं इति पृथक्वदन्ति

(यद् शास्त्रेषु-) सद्वस्तुनि सत्येऽपि तानि च निष्ठा तृतीयाः - एवंत्रेधा वृत्तेयाः प्रसिद्धाः

आचार्येणा- तदुक्तं सर्वाणि च शास्त्राणि विधिप्रतिषेधमोक्षपराणि, इति

अत्र निषेधमोक्षपरा तु- केवलं आत्मस्थितिरूपा- अक्रियात्मिका, प्रवृत्तिनिवृत्ते

क्रियारहितात् ॥

तथा च स्मृतिः- विहितस्याननुष्ठानात् अकुर्वन्विहितं कर्म-

(भावना)

१ ((ज्ञान·(भाव)- क्रियार्थकाः -)

(तृतीयः-)

अत्र विधिनिषेधाभ्यां प्रवृत्तिनिवृत्तिभ्यां पृथग्भूतः इन्द्रियनिग्रहरूपो धर्मः कथ्यते,

सच किं विधिः इति जिज्ञासायां- प्रवृत्तिनिवृत्त्युभयरूपः इति आख्यातम्-

(नैष तोयमन्नमादि स्वं इत्यादयः स्नातकधर्माः- तत्र नेक्षेत इति निषेधात्).

तद्यथा अनशनं (उपवासः) अहिंसा ब्रह्मचर्यं अपरिग्रहादयश्च- तेषामुभयरूपत्वम्-

अनशनम्-उपवासः- अथ ~~सा~~र्वेणस्थालीपाकः तस्य दर्शपूर्णमासाभ्यामुपवासः न ...

इति उपवासो विहितः, अनशनरूपः, तपो नानशनात् परं "(ना॰उ॰)

तच्च उपवसेत् (~~...~~) इत्यादि वाक्यविहितत्वात् प्रवृत्तिरूपम्, तस्य अनशन

रूपत्वात् निवृत्तिरूपम्- तेन उपवासव्रतस्य उभयरूपत्वं सिद्धमेव,

नहि तत्र अनशनं नाम कश्चित् क्रियां कर्तुमर्हति, अशना क्रियारहितमेव-

स्वार्थः परार्थः परमार्थः इति त्रयोऽर्थाः -

स्वार्थः - अर्थैः सहितः सार्थः - सोऽपि त्रिविधः - स्व-पर-परमरूपैः,
अर्थात् - स्वः - आत्मा - शरीरम् - स्वकीयम् - पुत्रादिकं सपरिवारम् - स्वशब्द
वाच्यम् - परः स्वस्मात् इतरः सर्वोऽपि प्रपञ्चः, प्रापञ्चिकः सर्वजनो वा समाजादि
तद्विषयकः स्वार्थः) सम्बद्धः परार्थः - "येन केन प्रकारेण कोऽपि जनः जीवति
परेषामुपकारार्थं यज्जीवति स जीवति" "परोपकारः पुण्याय पापाय परपीडनम्
इति च व्यासस्य पुराणवचनाच्च परार्थस्वरूपं प्रतीयते -
परमार्थः - स्वस्मात् स्वकीयात् - परस्मात् परकीयाच्च परतमः एव अर्थः
अर्थः परमार्थः, आत्मज्ञानादिरूपः शान्ति अभयादिरूपः मोक्षस्वरूपश्च
भवति तु मतिः -
तैरेतैः त्रिभिरपि अर्थैः सहितः सार्थः - इति एकेनैव केवलेन
अर्थशब्देन सङ्गृह्यते,
अर्थशब्दः - पदार्थवाचकोऽपि सन् फलबोधकोऽपि भवति -
तद्यथा - धर्ममीमांसायां "चोदनालक्षणोऽर्थो धर्मः" इति सूत्रे
निर्दिष्टः अर्थशब्दः फलादि प्रयोजनरूपं अर्थं बोधयति - प्रेरणालक्षणः
विधिरूपेण प्रेरकः अर्थः प्रयोजकः फलादिप्रयोजनसाधकः धर्मः इति -
निर्णीतोऽर्थः -
तथैव वैशेषिकदर्शने - "यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति -
धर्मस्य अभ्युदयनिःश्रेयसादिसिद्धिसाधकत्वं दर्शयति -
प्रपञ्च-परमार्थयोः सिद्धिरिति तदर्थः,

तद्यद्यहिंसाऽपि - भवति - हिंसारहितेऽस्मिन् तत्त्वप्रतिपादितमाचार्य पेन्द्रेण —
"ब्राह्मणो न हन्तव्य इति निवृत्तिरुपदिश्यते - न च सा क्रिया नापि क्रियासाधनम्
अक्रियार्थानामुपदेशो निरर्थकः स्यात्" ब्राह्मणो न हन्तव्य इत्यादिनिवृत्त्युपदेशानाम्
आनर्थक्यं प्राप्तम् तच्चानिष्टम् - तस्मात् प्रसक्तक्रियानिवृत्त्यौदासीन्यमेव -
ब्राह्मणो न हन्तव्य इत्यादिषु प्रतिषेधार्थं मन्यामहे, इति (शा. भा.: तत्तु समन्वयात्
तदेव ब्रह्मचर्यमपि - अपरिग्रहादिकमपि -
तस्मात् - एवं प्रवृत्तिनिवृत्त्युभयरूपत्वम् - निष्ठायाः "अनारभ्य इति रूपायाः
मोक्षाधिकारिणः अपि - इति देवयतीयतये - एवं प्रवृत्तिनिवृत्तिनिष्ठारूपत्वेन
त्रिविधत्वं वेदार्थस्य

वेदविद्या-

विद्याशब्दः आध्यात्मिकप्रक्रियारूपार्थबोधकः,

अस्मिन् यज्ञः, धर्मः, योगः, तपः संस्कारः प्रभृतीनि सर्वाणि साधनानि

अन्तर्भवन्ति,

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्

यज्ञरूपेण साधनेन यज्ञपुरुषं (स्वरूपं) (देवाः ज्ञानिनश्च) अयजन्त आराधयन्ता,

तानि सर्वाण्यपि साधनानि धर्माणि धर्मस्वरूपाणि आसन्निति भावः -

तादृशयज्ञसिद्धये ऋषयः तं परमात्मानं अग्निं आह्वयन्ति,

"इमं नो अग्न उप यज्ञमेहि पञ्चयामं त्रिवृतं सप्ततन्तुम्" इति

स च यज्ञः (धर्म) योगादिरूपः त्रिवृतः पञ्चनियमयुक्तः, सप्ततन्तुः

सप्तसंस्थावितत: इति तदर्थः -

सेयं विद्या ज्ञान-भावना-कृतिरूपा प्रक्रियारूपेण अनु

ष्ठातुं योग्या वेदेन विहिता समर्थिता वेदार्थरूपा इति निवेदयावः

अत्र त्रिवृत्करणतत्त्वेन भूतत्रयेण (तेजोऽबन्नरूपेण) सम्बद्धा त्रिकरणैः साध्या

वाक्प्राणमनोरूपैः संराध्या, भवति।

अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाग् इति

औपनिषदं वचनं प्रमाणम्।

अत्र-ज्ञानशक्तिप्रधाना वाक् - क्रियाशक्तिप्रधानः प्राणः, भावना

शक्तिप्रधानं मनः इति विवेकः, त्रयाणां तेषां योगेन यज्ञः योगश्च

सिध्यति- यज्जातवेदो- तं त्वा हेम मतिभिर्गीर्भिरुक्थैः.

हे जातवेदः (सर्वस) अग्ने त्वं अस्य भुवनस्य मूर्ध्नि ज्योतिषा (यस्मात्) यतः तिष्ठसि

अतः त्वा इदृयज्ञार्थसिद्धये मतिभिः मनसा गीर्भिः वाग्भिः उक्थैः प्राणैः

सह त्रिकरणयोगेन हे आहूयामः स त्वं विश्वसाधकः मम सहायः अभवः

एतत्साधनः यज्ञफलप्रापकश्च भवसि च

त्रिकरणप्रस्तावे इदानीं कायिकं वाचिकं मानसिकंचेति त्रीणि करणानि,
वैदिके तु ~~[illegible]~~ कायस्य स्थाने प्राणः प्रतिष्ठितोऽस्ति शरीराद्यपेक्षः-
प्राणे शरीरं प्रतिष्ठितम्, शरीरे प्राणः प्रतिष्ठितः प्राणाधारकं शरीरम्- इति तदनुशासनम्-

पञ्चीकरणवत्त्वे तु त्रिकरणेन सह श्रोत्रं नेत्रंचेति ज्ञानेन्द्रियद्वयं गृहीतम्-
अस्मिन् प्रपञ्चे सर्वाण्यपि वस्तूनि नामरूपाभ्यां आकृतानि तयोर्ग्रहणे
श्रोत्रं नेत्रंच करणम्-
"भद्रं कर्णेभिः शृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः इति- तदनुश्रुतिः-
एतानि पञ्च ध्यानेन्द्रियाणि सर्वविद्या-यज्ञ-योगादि साधनानि भवन्ति,,
बाह्येषु द्रव्ययज्ञेषु सोमादिषु पञ्चर्त्विजः ज्ञानसाधनानि भवन्ति-
होता अध्वर्युः उद्गाता आग्नीध्रः ब्रह्मा इति। (यजमानः यज्ञपत्नीच यज्ञकर्तारौ)
तथैव- विद्यायज्ञे तावत् पञ्च आन्तर्याः ध्यानेन्द्रियरूपाः पञ्चर्त्विजः प्रसिद्धाः
वाग्घोता प्राण उद्गाता चक्षुरध्वर्युः मनो ब्रह्मा श्रोत्रमग्नीत् इति-
आत्मा यजमानः श्रद्धा पत्नीचेति औपनिषदं तत्त्वम्-
आन्तर्ये ध्यानयोगेऽपि तत्समानम्- ध्यानयोगस्य उपदेशः
"यस्मादृते न सिध्यति- स धीनां योगमिन्वति" इति- यस्मात् ब्रह्मणस्पते विना
ज्ञानिनोऽपि यज्ञो नैव सिध्यति स ब्रह्मणस्पतिः धीनां योगे सम्यगेव प्रसादेन
प्रादुर्भवतीति- सैषा विद्या वैदिकी वेद्या- तदभ्यास साध्या.

—

तान्येतानि पञ्च ध्यानेन्द्रियाणि परमपुरुषस्य चित्सत्तयैव आविर्भूतानि
चन्द्रमा मनसो जातः- अग्निर्वाग्भूत्वा मुखं प्राविशत्.
एतेषां योगेन एकमेव ज्ञानसत्त्वं समुदेति- ध्रुवं ज्योतिर्निहितं- (यज्ञिकेत सञ्चक्रुः ...
२ ॥ सर्वेन्द्रियाध्यक्षा ~~[illegible]~~ स्वयं देवाः सर्वे देवाः समनसः मनोयुजाः;)
सकेताः समानाः एकं क्रतुं ज्ञानं साधु सम्यक् अभिवियन्ति- क्रतुशब्दः ज्ञानयज्ञ
१+ अस्मिन् सर्वस्मिन् पुरुषे ध्रुवं अचलं शाश्वतं ज्योतिः चैतन्यरूपं निहितमस्ति
मनसोऽपि जवीयः ज्योतिः,

+

ऽतो पुंच ज्ञानेन्द्रियेषु यः एकैकमेव आश्रयते स न किञ्चि
द्विजानाति न फलं प्राप्नोति तस्य अपूर्णज्ञानादेकदेशित्वात्

ः एकैकमुपासते न स वेद अकृत्स्नो ह्येषः — आत्मेत्येवोपासीत

ज्ञानेन्द्रियाणि च आन्तर्याणि —   सकृत्स्नः आत्मैव पूर्ण प्रज्ञः

वि मे कर्णा — मनिष्ये इति —

मे मम कर्णौ ~~रूप~~ शब्दश्रवणे पततः चक्षुः रूपदर्शने इदं प्राणात्मकं मे
ज्योतिः हृदये — आहितम् — मनः दूरे सम्बद्धं सत् संचरति,
यत्किंचिद्वाच्यं वदामि यच्च किंचित् मनिष्ये जानामि —
ज्ञानादिसाधनानि तान्येतानि भवन्ति — प्रसिद्धानि सर्वान्तरेणि
संसिद्धानि इति — तदभिप्रायः

२

केनेषितं पतति प्रेषितं मनः इत्यादौ तदेतद् देवो पर्यंसते जिनि बोध्यं

+

२

एवमेव पञ्चीकरणतत्त्वे आदिसृष्टौ प्रजापतिनः सकाशात्
प्रजातानि आकाशादीनि पञ्च महाभूतानि, ~~तेषां तन्मात्ररूपाः~~
तत्र शब्दादयः पञ्च तन्मात्ररूपाः गुणाः. तेषां ज्ञाने श्रोत्रादीनि
पञ्च ज्ञानेन्द्रियाणि प्रसिद्धानि — तेषां पञ्चानामपि ज्ञानेन्द्रियाणां
~~संयोगे~~ समायोगेन कश्चिदलौकिको योगः सिध्यति,
कोऽयमात्मेति वयमुपास्महे — कतरः स आत्मा येन वा पश्यति
येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति
येन वा स्वादु चास्वादु च विजानाति यदेतद्धृदयं मनश्चैतत् ॥ ऐ ३-२
इति पञ्चानां ~~ज्ञाने~~ ज्ञानेन्द्रियाणां अध्यक्ष आत्मा उपास्यत्वेनोपदिष्टः
संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः
स्मृतिः संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येवैतानि
प्रज्ञानस्य नामधेयानि भवन्ति॥ सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं
प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म इति

२

अयमेव पञ्चयामो यज्ञः येनात्मा आर्जितुमर्हति, इत्यादि वैदिकी
योगविद्याऽपि — वेदविद्याऽपि अपेक्षा —

एतैः सप्तभिः ज्ञानेन्द्रियैः सह मनो बुद्धिश्चेति अन्तःकरणद्वयं युक्तं सत्

सप्त इन्द्रियाणि भवन्ति। तान्येव सप्त तन्तवो यज्ञस्य।

॥ यज्ञं पश्चाद् वितन्वन्तो- तं योगमिति मन्यन्ते। इति-

इयमेव योगविद्या - विद्यामेतां योगविधिं च कृत्स्नम् इति उपदेशात्-

एतेषां ब्रह्म यज्ञादिषु सप्तर्त्विजः सप्त संस्था प्रवर्तिकाः भवन्ति।

एतेषां सर्वेषां ज्ञानकर्मेन्द्रियाणां तिस्रो वृत्तयः सन्ति- प्रवृत्ति निवृत्ति निष्ठा चेति

विहितेषु नियत

सद्विषयेषु प्रवृत्तिः दुष्टेभ्यः असद्विषयेभ्यः निषिद्धेभ्यो निवृत्तिः

अत्यन्तं हिते सत्यवस्तुनि निष्ठा निश्चला प्रतिष्ठा चेति

एतेषां वेदविधानानुसारेण नियमेन प्रवर्तने विद्यायज्ञः योगः धर्मश्च सम्पद्यते,

यथेच्छाचारे अविद्यादिरूपं तत् - इति विवेकः। "तत्र प्रागुपनयनात् कामचारकामवाद

कामभक्षाः" इति अभ्यनुज्ञया प्रतीतं च-

२.

तदिदमेव प्रतिपादितमाचार्येन्द्रेण- "सर्वाणि च शास्त्राणि विधिप्रतिषेध

मोक्षपराणि" इति- तस्यैवेदं निर्वचनं स्वरूपं च भवितुमर्हति-

नियत

सर्वाणि वेदशास्त्राणि प्रवृत्ति-निवृत्ति निष्ठापराणीति।

अतीन्द्रिय योगविद्या

एवमेतेषां सप्तानां ज्ञानेन्द्रियाणां अतिक्रमणेन- अन्तरात्मनि निरवद्या पश्या

वागेव अम्भृणी ज्ञानशक्ति प्रधाना चेतना निष्ठा- तया सह अतीन्द्रिय योगः

सिध्यति-

परस्पराणां

अत्र एतानि श्रोत्रादीनि सर्वाण्यपीन्द्रियाणि बाह्याभ्यन्तराणां विषयाणां ग्रहणे

ज्ञाने च प्रधानानि, स्वविदितार्थानां परस्मै प्रदाने वागिन्द्रियमेकमेव शरणम्।

एतैर्वेत्तुं कल्पनातीतो भावः, किन्तु - सप्तानामपि ज्ञानेन्द्रियाणां योगेन ब्रह्मविद्यैर्ज्ञान

[illegible] गृहीतान् तत्त्वदर्शनं वागेव बोधयति - वाङ्मयं प्रकाशयति। तदेतदेव वेदो नुरनुवदति

सप्तधा [illegible] कोशं [illegible] वदत्" इति। अतएव [illegible]

सर्वेन्द्रिय संपर्कं मन्वाना [illegible] निवर्तनेन [illegible] उपदिशति

" प्रतीचीनं [illegible] प्रतीचीं [illegible] वाचं [illegible] इति

म• मं• [illegible] । |

अत्रोर्ध्वगानुकारिणी - नेत्रे वाक् स्तुत्यन्ते: स्वमनसा मनसा स्वरी
आनुसन्धानाद्यादिति (डॉ. ओमा.)

यत्रोर्ध्व त्रिवृतं त्रिगुणात्मकं यतो योगिके
गर्भाधानकृतः प्रजापति कृते त्रिसूत्रता योगिके च
सूत्रं तत्त्रैनिवीतमेव विहितं यज्ञोपवीतं स्मृतौ
स्वाध्यं तेन च सत्कर्मनियतं स्त्रीये सुतीर्यद्वितौ ।

विष्णुर्योनिमिमं प्रकल्पयतु त्वष्टा रूपाणि वै ।
वीर्यं सिञ्चतु ~~वत्स~~ प्रजापतिरसौ चैतन्यसत्तान्वितः ।
धाता गर्भमिमं दधातु पुरुषं जीवोदये ~~स्वाभिमं~~ ज्योतिषं
~~सिञ्चतः~~ सिञ्चतु ~~देहमन्यक~~ स्वतः धारयत्य सोगोऽत्र भावः
...... रेतःपुं पुरुषवाद -

छन्दस्वकी- आतिष्ठ(?) :-

गायत्री त्रिष्टुप् जगती | तिस्रो वाचः - ज्योतिरग्रा(?)
अग्निः इन्द्रः विश्वेदेवाः | ओं भूर्भुवः स्वः - सद्गुणयः (त्रयः)
वसु रुद्रः आदित्यः | इडा सरस्वती मही - अग्निः -
८ ११ - १२। | ऋग्यजुः सामानि - स्वरः

अग्नायी इन्द्राणी वरुणानी सोमः -

~~छन्दः~~ - स्वरात्मिका

उदात्त अनुदात्त स्वरित प्रचय

ह्रस्व दीर्घ प्लुतः ~~पूर्ण~~ ~~बिन्दु~~: त्रिमात्रा-
१ २ ३ ४-

उच्चैः नीचैः - समाहारः-

(द्वितीया कक्षा)

१ ~~[illegible]~~ तिस्रो न्यूनतिरिक्तात् स्वपः परस्थिते रों भूर्भुवः स्वः स्रुवः
वाचो ~~[illegible]~~ आहृतय श्चतस्र उदिता वाड्येति ~~[illegible]~~ श्रुताः प.
सोऽग्निस्तस्य ~~[illegible]~~ प्रवदत्सज स्त्र मकृतास्ताः सस्वराः सेन्द्रसाः (2- १)
सूत्रात्मक प्रतिपादकस्य ~~[illegible]~~ प्रतिततः - ~~सूत्रात्मकौ~~ सस्वाध्वरः
प्रतिपादक -

२

२- वाचस्ताः प्रस्थिता (प्रकृताः) परप्रकृतयः छन्दः ~~[illegible]~~ कालकाः
ज्योतिश्च अग्निर्वायुरविजाः (त्रिगुणा) तान्येव यजुः सामकाः
२ तिस्रोदेव इति प्रथमानुपगताः वाग्देवता मूर्तयः प.
१ ताश्चैवाद्य सरस्वती ~~[illegible]~~ - ~~[illegible]~~ सरस्वती च त्रिताः
~~पुनः~~ (~~सरस्वती~~)

३ गायत्री त्रिपदा चतुष्पदवन्त्रि ष्टुप् जगत्यौ समौ.
सा त्रिच्छन्दस्स सप्तरूप पदभृत् - सा वाक् चतुर्धा स्थिता.
छन्दांस्येव हितप्रदानि निहितान्यन्तर्हितानि स्वयं
ये वैतानि विदुस्ततस्त्र तपसा - दिव्यामृतं ययुः प.

२

४- अग्नायी यत्किल महीमथिगता यज्ञीय वेदिं ~~[illegible]~~ गता
सेन्द्राणी प्रथिता ऽन्तरिक्षसदने स्वाभारती कथ्यते प.
पूर्वीवं ~~[illegible]~~ सरस्वती ~~सरस्वती~~ दिव्या (~~[illegible]~~) वारुणी
तुर्यातीव - परोरजाः सरस्वती सत्रात्मिका ब्राह्मणी प.

२

छन्दस्त्वदेहा स्त्रयो युतनवः वाच्योऽत्र मन्त्रात्मकः
वर्णक्रूस्थानयुक्ः स्वरप्रकृतयः सूक्तात्मकः -
वेदास्ते द्विविदेवताप्रकृतिकाः यज्ञार्थे विहिताः
ब्रह्मात्मैकगुणान्विताः प्रणातिकाः यज्ञोपवीतार्थकाः
॥

५ ब्रह्मात्मैव सरस्वती स्वरवती छन्दस्वती वाक्पयस्वती
सूत्रात्मा परमेतना गुणवती मन्त्रार्णमात्रवती च
(हृस्वाच्च दीर्घप्लुता)
सोदात्तस्वरितानुदात्तवचना उच्चैश्च नीचैः स्वराः च
तुर्यान्ता प्रचयाऽङ्गुलीषु निहिता वाच्यश्च तत्त्वः स्वराश्च
॥

६ एकद्वित्रिकमात्रया प्रवितताः हृस्वाश्च दीर्घाः स्वराः
सामान्येन स्वराः स्वराः समुदिताः सूत्रात्मसंबोधिताः च
यत्रीये प्रणवाक्षरैऽन्तिमपदे तुर्ये ऽनुस्वारके
पूर्णस्यादव स्थानबिन्दुपरकं मात्राचतुष्कात्मक
॥

७ मन्त्रोऽन्तः परसूत्रवत् प्रवितते ब्रह्मात्मचित्सन्तते
सन्तेऽन्तः प्रतिमात्रया प्रतिष्ठिते यज्ञोपवीतं मतं च
ब्रह्मौकाक्षरमन्त्रकं च्चिदुदितं सूत्रात्मकैर्गुणैरन्वितं
वाग्ब्रह्मात्मकच्चित्स्वरात्मकलितं तदयज्ञसूत्राञ्चितं च
॥

८ यज्ञात्मा निजसंख्यया प्रवितताः ब्रह्मात्मकः पूरुषः
सूत्रात्मा ऽपि परस्परैः समनुस्यूतः [illegible] च
[illegible] मन्त्रैः सुमनसा सूत्रं परं धारयन्-
गायत्र्यां हृदि भावयन् सुमनसा ध्यायेत् परंज्योतिरजं च
॥

९ श्रद्धावेशनयने बटूपनयने ब्रह्मोपदेशायने
शिक्षादानयने धियां प्रणयने ब्रह्मार्थविन्यायने च
स्वानन्दोज्ज्वलने विद्यानुदयने ब्रह्मानुभावात्मने
साक्षात्कारकृते धियां सुनयने तद्ब्रह्मसूत्रं नमः ॥

१० सद्बोधोदययने तदध्ययनयने सद्ब्रह्मचर्यायने
सद्विद्याश्रयसने धियां विकसने दुर्वासनोदासने ॥
सौजन्योदययने सुसंविदयने सत्प्रेमसंस्थापने
सत्याखोच्चयने स्वधर्मचरणे तद्ब्रह्मसूत्राय नमः ॥

११ सत्येरमसने सतां सुवसने ध्याने सदाध्यायने
नित्ये निर्मलसने मनः सुखसने धर्मोद्योगनिष्ठासने ॥
यज्ञार्थेयतने स्वदेवयजने सर्वप्रसन्नावनं
विज्ञाने विशुविविक्तसेवनवने यज्ञोपवीतावनम् ॥

१२- गायत्रीस्मरणे सुमन्त्रवरणे तद्ब्रह्मविद्यार्हिणं
सन्ध्योपास्तिगुणे व्रतानुकरणे यज्ञोपवीतार्पणम् ॥
ज्योतिर्दर्शनगुणे विशुद्धिकरणे तद्धारणार्हिणं
ज्योतिर्ब्रह्मगणे परात्परमणे ब्रह्मात्मसंदर्पणम् ॥

ब्रह्मसूत्रात्मा प्राणः प्रज्ञात्मा इन्द्रः, विश्वरूपः विश्वविनिर्मितिपूर्तिः

२

१३ ब्रह्मा स्वयमिन्द्र एव भगवान् सन् पारमैश्वर्यभाक्
ब्राह्मीचेतनया समिन्धति स्वकं सत्त्वात्मवाक् च
नित्यं विश्वविश्वविनिर्मितिपूर्तिपुरुषः तस्यैव विश्वं वशे
सर्वं स्यात्तत् इति नमो भगवते ब्रह्मात्मने सन्तु ये

१४- सेन्द्रः मन्दिरयाति प्रतर्दनकृते सद्मानवानां कृते
स्वात्माय वरं हितकरं ब्रह्मात्मसंविद्कृते च
प्राणोऽस्मि स्वयमिन्द्र एव परमः पूर्णात्मकः पूरुषः
प्रज्ञात्माऽमृतमायुरित्यभिमतं तं मामुपास्वेति वै च

१५- "प्राणाद्वायुरजायतेति विदितो नारायणेनोदितः
प्राणो वायुरिति प्रतीतिविहितो व्याप्तः स बाह्यान्तरः च
सूत्रात्मा स च वायुरित्यभिहितः सद्गौतमायार्थिने
व्याप्तरितः प्रचेतनवतः सूत्रात्मविद्यार्थिने च

१६ सूत्रेणैव हि वायुनाऽमुना गुम्फितानि सर्वाणि भूतानि वै
विस्रब्धानि भवन्ति चेतनमनुस्यूतानि सूत्रात्मना
वायुर्गौतम सूत्रमित्यनुमतं जानीहि सर्वात्मना
सैवायुः स्तुति वेदितं श्रुतिनुतं यावच्छरीरे हितम् च

वायवायाहि दर्शित-

१७- लोकेऽस्मिन् खलु वायुनैव सकलं सन्दर्शनीयं भवेत्
आयाहीति च दर्शितं मधुच्छन्दर्षिणायं स्तुतः ॥
भूय आदावपि दर्शिताय भवते वायात्मने
तस्मै स्वात्मज्योति नमो भगवते दृश्यं तुरीयात्मने च

२

१८- छन्दो दर्शनवेदकेश्रुतिनुतं सद्दर्शितं चित्पदं
तद्दृष्टिव्यं सवितुस्तुरीयममृतं पूर्णं तुरीयं पदम् च
धीनां योगरसाभ्युदीरणपदं सर्वं विभासयित्
ज्योतिस्तत् परमं प्रचेतनपदं विश्वं प्रसन्दर्शयेत् च

२

१९- चिज्ज्योतिः किरणात्मकाः समुदिताः केशाश्च चिद्रूपकाः
चित्ज्योतिरसत्तया प्रमुदितः केशं पुसङ्काशकः ।
वायुः स्वान्तरितेन्द्रचित्तिकिरणः स्वेन्द्रेण सन्दृश्यते
विद्युत्स्वात्मकरश्मिचेतनगुणः सन् पावनो ~~मोदते~~ ते ।

वायुः- प्राणः-
संवर्गः
परिवहः
सूत्रात्मा
पवमानः-

२० वायोः स्वं पदमन्तरिक्षसदनं द्यावापृथिव्योः सदा
मध्यं सन्धिपदं सुगुह्यमपरं स्वैन्द्रचित्साम्यन ।
प्रत्यक्षा पवनस्य चिद्द्युतिरियं रूपं तु नो दृश्यते
सुस्पर्शो वगम्यते चितिगतैः सन् परामृश्यते ।

२१ आकाशेदृश्यमितां सतां दिविपदां ज्योतिश्च देवात्मनां
आन्तर्यो भुवनस्य गर्भ उदितः स्वातन्त्र्यतः सञ्चरन् ।
ओजा एव हि शब्दतास्थितिपदं वाता ससृजे नमः ।
रूपं नैव हि दृश्यते चिदुदितं संश्रूयते सद्धन ।

~~२२~~ २ सूत्रात्मा स च वायुरेव परमः प्राणात्मकः ~~सत्त्व~~प्तिदः
+१ प्राणात्मापि च सूत्रवत्सकलमनुस्यूतः समस्तान्तरः ।
२५ प्राणोऽयं ननु तन्तु ~~कोश~~ विरच पुरवे देहेन्द्रियैः सन्ततः
प्रसङ्गान्नाडिरसं विभाति दशधा ज्ञानात्मसत्त्वात्मिकः ॥

नवद्वै पुरस्यैव
नाडि द्विशतो-

२२ संवर्गः वायुः प्राणः-
संवर्गः स च वायुरेव निखिलः प्रत्येतना सम्पदः
संवृङ्क्ते सकलान्निजान् दिविषदः सोऽत्राधिदैवात्मदः ।
देवैस्तैः सकलैः परैः परिवृतः दिव्यामृतत्वाप्तये-
दिव्यैस्तैर्विमलैः करैः परिवृतः सर्वात्मसन्तृप्तये ।

यथा-
प्राणोत्सार्द्दिप...
अपानः अधकर्ि...
आनोऽन्नाद्यैः...

२३ प्राणः प्राणनक्रियाधिकृतः संवर्गोऽध्य~~...~~ सेव्यते
प्राणिष्वन्तरितः समेषु पुराणेष्वध्यात्म मन्विष्यते ।
श्रेष्ठः सन् सकलेन्द्रियेषु विततः प्राणः समुद्बोधितः
चन्द्रेणाकरसैकसन्तनसा वाग्जिह्वया संहितः ।

वायुः ॥ पवमानः ॥ प्रजापतिः ॥

२४ वायुर्वै पवमान इत्यभिमतः सम्भरणात् पावनः ।
विद्युत्तै जगतां ~~वन~~ तास पवते स्वीयेऽन्तरिक्षे ~~स्वे~~ चयनः ।
वाति प्राणचिता ~~...~~ प्रजापतिरयं गच्छन् सदा सर्वतः
गन्धान् ~~...~~ सन्ततमानयन् सहसा संयोजयन् सर्वथा ।

॥ वायुः परिमलः ॥

२५ वायुर्ब्रह्मान्वितोदितः [illegible] संज्ञो प्राणादिरपरः
वायौ पञ्चाऽपि देवताश्चिवर्गिकाः तस्मिन् प्रियन्तेऽततः प
विद्युद्वृष्टिश्चन्द्रस्तथादित्यः सूर्यस्तथाऽग्निः स्वतः
२६ वायोरेव पुनः [illegible] स्वप्रकाशा जायन्त इत्याचरितः प
(प्राणस्य प्राणादि)
+

२७ - ज्ञानगुणेन्द्रियाणि सहितं तद्भूततन्मात्रकं
स्यादन्तःकरणं चतुष्टयमितं सिद्धं च वायवादिकं प
प्राणस्यैव वशे स्थितं हि सकलं ते प्राणसत्त्वाः स्मृते
(प्राणिनः सत्ता दृश्यं पदं) प्राणानां दशधा समाविष्टः
प्राणापानादिकाः

२८ - प्राणः प्राङ् मुखतो बहिश्चरति यः सोऽन्तर्मुखोऽपानकः
अप्राणन्नपानवृत्तिर्मतो ऽन्तस्तयोर्मध्यगः प
वाक्सत्त्वान्वसतो भवेत् [illegible] मध्ये तत्स्थोऽपरः
[illegible] वृत्तियुक्ततः [illegible] प्राणः स वायुः परः प

२९ सैकः सन् त्रिगुणीकृतः पुनरसौ प्राणास्त्रितत्त्वान्वयात्
ज्योतिष्मानग्निदैवते समुद्गात् सूर्योऽग्निरिन्दुः स्वतः ॥
अध्यात्मं तु चिदात्मनोऽन्वितमिदं [illegible] नाडी तन्मनः
सूत्रात्मेव तन्तुकं [illegible] दशानां [illegible] कल्पितम्

३० - मध्ये प्राणपरोऽग्निरादिमपदे सन् गार्हपत्यः स्वयम्
[illegible] दाहवनीय इत्यभितः पश्चात् प्रणीतः [illegible] ऽपानो हितः प
पूर्व
मध्ये दक्षिणतस्तयोरथ सतः सन् दक्षिणाऽग्निः परः
समानो सोऽग्निर्हुतः

३१ - त्रिष्वेतेषु च वेदमन्त्रमुखतः छन्दस्त्रयी योगतः
यस्तः सिध्यति सर्वदा विकुर्वतः
यज्ञात्मा पुरुषः प्रचेतनतनः ज्योतिस्त्वमात्मा स्थितः
[illegible] पुनर्विततोऽयमोपनीतांश्चितः प

३२ - तद्ब्राह्मणमन्त्रदैवतहविः [illegible] ब्रह्मान्तरस्यात्मकं
ब्रह्माग्नौ हुतमेतदत्र सकलं तद्ब्रह्म चौर्वावाहुतम्
ब्रह्मौवाच्यनुगायमान्तरतमं तद्ब्रह्मकर्मात्मना
ब्रह्मैवैतसमाधिना परतमं [illegible] ब्रह्मणाय प

२५ + ३
२ [illegible] २५
२५२४ -

॥ शून्याधिकार सङ्ख्या –

1 सङ्ख्याः सूत्रमयीङ् मात्रमयी सूत्रपूर्णिका सत्त्वान्वया
सङ्ख्या योगस्य वस्तु याथार्थ्या स्मृता सङ्ख्यया ।
वाच्यो नाह गुणा इत्याऽऽकलय्य योगेन वृत्य यथा
वाच्यार्थे निगमितव्य ग्रखिलार्थतत्तया सङ्ख्याः सर्वे सन्ततम् ॥

2 सङ्ख्यापूर्णविरामबिन्दुसदनं
सङ्ख्यानां गुणक्रियासु गगनाद्यनन्ताद्यसङ्ख्यायना
सत्तारूपकधर्मकर्मरहिता पूर्णाख्यसङ्ख्यायना
सत्तानादिकबिन्दुपूर्णकलना सङ्ख्यानना ॥ वन्द्या –

3 पूर्णाख्यायनधातु स्वयं प्रविततः सच्चेतनः सन्तमः
कश्चित्खिलज्योतिःसार भगवान् आनन्दसच्चित्तमः ॥
भू आत्मा भवतो सती भगवती सच्चिन्तु सत्त्वोत्तमा ।
ब्रह्माण्डेयमपात् सती बृहती ब्रह्मोपरा चेतना ॥

4 सर्गादौ तदपादु देहि परमा साय ध्रुवीनां परा
मेवानब्रह्मणा समाचचरमा पूर्णाख्य स्वात्मेश्वरा ॥
स्वां शाक्तिं स्वपद सत्त्वरहिता सङ्ख्यान्त सत्त्वोत्तरा ।
अन्यस्मात् सदसत् प्रमापरतमा ब्रह्माद वागीश्वरा ॥

5 सर्वोर्ध्वं चेतनाऽप्यनवमा विश्वाधिष्ठानभाक् –
स्वानिर्दिष्टचेतनाऽप्यवदना – सत्तानतिद्वारिणी वाक् ।
तत्सर्वौनं सदगोचरं हि मनसः वाचां च तस्मात् विश्वात्मनां
वाचाऽनिर्वचनीयनिश्चिततरां प्रोत सर्वात्मना ॥

૬ પૂર્ણો બિન્દુરણોઃ સુસૂક્ષ્મકતરાત્ ~~ચિ~~ ચિત્તેરણીયાન્ પરઃ
પ્રત્નાત્પ્રત્નતમઃ સુસૂક્ષ્મકતમઃ સચ્ચેતનઃ સત્તમઃ ॥
પ્રત્યગ્ભ્યન્તરિતોઽપ્યનાન્તરતમઃ ચિદ્વ્યોતિ રાકાઽપરઃ
ગુહ્યાદ્ ગુહ્યતમઃ પરોરસ્તતમઃ પૂર્ણાત્મસંબિન્દુતમઃ ॥

૭. આમ્નાયેઽત્ર મહાન્ તતોઽતિમહતો ~~[illegible]~~ મહીયાન્ સ્વયં
બૃહત્ ~~[illegible]~~ તથૈવ બૃહતો બૂ~~[illegible]~~ બૃહત્વાન્વયાત્ ॥
શક્તિ બૃહત્તમા ચ
શક્તિ ~~[illegible]~~ બૃહતી વા કૃચ્છ મહીયસી ચ મહતી વત્સ ~~[illegible]~~ મહીયસ્તમા
મહાર્થેન બૃહત્તમા ચ બૃહતી સંભ્રાજતે સત્તમા ॥

હિ સ ઙ્ ક્ષ્માત્મકં
૮ પૂર્ણાદેવ હિ બિન્દુતઃ સમુદગાદેકં ~~[illegible]~~
સમસ્તાત્મકઃ
સઙ્ક્ષ્યેયં પર~~બ~~સ્તુ સર્વવચના~~[illegible]~~દેકં ~~[illegible]~~ ॥
સૈકાત્મૈવ જગતીહ વાઙ્મુખ જિહ્વા જ્ઞાતૃ પરા ચેતના
વાગ્બ્રહ્માત્મ સુધાકરસ્યાનિહિતા ~~[illegible]~~ સ દ્વાન્યકાત્મોત્તમા ॥

૯. પૂર્ણં તત્પર બિન્દુસત્ત્વ શબલં તજ્જ્ઞાવગાતીતગં
તદ્દેવાઽભ્યુદિયાય યદિદસ્તપરમ

२ रचनाकं - पंचकं

पुरुषः
तत् - प्रथम
त्वं - मध्यम
अहं - उत्तम
(प्रथमः)

१ विवरण वाक्
२ लिङ्ग स्त्रीणि त्रीणि
३ वाच्य कवचन
४ प्रत्यक्ष परोक्ष परोक्षाणि

१ आरम्भार्थिक साक्रियानुवचनं प्रयुक्तानि प्रश्नैः । ५ - प्रतिपादकार्थि -
आरम्भैः पुरुषैस्तथानुवचनैः एकाद्विबहुार्थकैः । ६ -
सङ्ख्याभिः क्रियापदपदैः त्रयाततैः स्त्रीत्रिभिः । १ आरम्भार्थिकं -
प्रथमान्तं नवसन्नकं तत् सूचितं वाग्ब्रह्म सत्त्रात्मकम् । २ - नामपदात्मकं -

२ त्रीणि त्रीणि लिङ्ग स्त्रीणि प्रतिपत्तैः साकारार्थप्रश्नैः - लिङ्ग - वचन - प्रश्नानि
आरम्भोदित नामनेपदपदं पूर्व परस्मैपदम् ।
वद द्वे वा वचनैः पदैश्च नवाभिः सप्रश्नैः सूचितं
ज्ञानेच्छाकृतिचेतनाकृतिभिः सातत्यम्

३ - आरम्भैः प्रथमः परोक्षपुरुषः सस्यात् परोक्षार्थकैः कालात्मकं ...
प्रश्नः खलु मध्यमोऽत्र पुरुषः त्वं चेति युष्मत्परः
प्रत्यक्षस्याद्यमुत्तमोऽत्र पुरुषः तत्राहमस्मत्परः
त्रैधा प्रश्नपदैस्त्रिभिः समुदितं वाग्ब्रह्मपुत्रं पदम् २ नक्षत्र कालात्मकम्

४. तेषान्तु वचनत्रयं प्रतिहितं सैकाद्विबह्वर्थकं
त्रिष्वन्ताः पुरुषास्त्रयं च सहितं त्रैधा समस्तार्थकम्
अस्त्येतच्च समस्तमप्यभिहितं सम्बन्धसङ्ख्यान्वितम्
एकां तत्र गुणैस्ससूत्रनवकं वाग्ब्रह्मणा ग्रन्थितम्

५
तद्वत्स्यादिह नामरूपविततं शब्दार्थसंप्रश्नैः -
लिङ्गैः स्त्रीत्रिभिरुचवरतु परकैः स्त्रीपुन्नपुंसार्थकैः ।
सङ्ख्याभिर्वचनैस्त्रिभिः सुगमकैरेकाद्विबह्वर्थकैः
सङ्ख्यैरपि वस्तुतन्त्रपरकैः सूत्रात्मकं संस्कृतम् ॥

६ - सुप्रतिप्रत्ययाश्रितैः प्रतिपदं त्रिःसप्तसत्त्वान्वितं
विभक्तिः स्यादिह एकविंशति परं तद्यत् संख्योदितम् -
अव्ययकं प्रतिपूरुषं पुनरिदं सम्यक् तनोत्यक्षरम्
आत्मार्थं वचनेकविंशतिः ततः प्रश्नात्मकाः पुरुषाः ।
~~... पुरुषो यथान्त ...~~

૧ આનન્દમયોઽભ્યાસાત્ ।

૨ વિકારશબ્દાન્નેતિ ચેન્ન પ્રાચુર્યાત્ ।

૩ તદ્ધેતુવ્યપદેશાચ્ચ

૪ માન્ત્રવર્ણિકમેવ ચ ગીયતે ।

૫ નેતરોઽનુપપત્તેઃ ।

૬ ભેદવ્યપદેશાચ્ચ ।

૭ કામાચ્ચ નાનુમાનાપેક્ષા ।

૮ અસ્મિન્નસ્ય ચ તદ્યોગં શાસ્તિ ।

(प्रकाशित किया —
कालचक्र —
[illegible]

नक्षत्रं रेखात्मकं यान्त्रिकम्

१ बिन्दुर्बिन्दोर्ध्रुवतः समुद्दितौ ततस्तौ द्वौ गुणौ स्वौ स्त्रिभिः
वृत्तस्यानुगुणोऽहिता विरचितः ईस्ते श्वरे सक्रियताः
तासां तत्र मुखेन तत् समुच्चितं योगात् त्रिकोणं स्थितं
साक्षाद्यस्य पटोऽरवत् परतः चक्रं चतस्रं स्थितम्

२ भूयस्तत्र प्रोच्चितं त्रिकोणकीलितं त्रेधा समं संहितं
बाह्यान्तर्यपराणकं प्रतिबिम्बं सरस्तं समस्तं हितम्
सिद्धं तन्नवकोणचक्रमपरं पूर्णं नवब्रह्मात्मकं
सिद्ध्येदन्तर बिन्दुनाथ सद्रसान्तं तारात्मकम्

३ साध्यं तत्र चतुर्दलं च परितः भूयस्त्रिकोणाद्बहिः
तत्साधनानां च चतुष्टयं परिमितं तद्वि चतुष्कास्थितम्
संसृष्टं च पुनः सुबिन्दुसहितं तत्सप्तपद्मात्मकं
संयुक्तं च पुनस्त्रिकोणगणितं स्यात प्रपञ्चात्मकम्

४ षट्कोणेन सबिन्दुना समुदितं सप्ताङ्गचक्रं भवेत्
सिध्येत् सप्तभिरेव तत्र ऋतुभिः कालस्य चक्रात्मकम्
संसिद्धाः प्रथिता ऋतेव च ऋतवः संवत्सरे सप्तताः
सोऽयं खलु सप्तमः स च ऋतुः सोऽन्ते हुतिरिक्तोऽन्तः

५ सूत्रात्मा खलु कालचक्रविततः संवत्सरः कोऽदितः
कालग्रन्थिमयः प्रजापतिरसौ साबिन्दुरूपः स्थितः

नक्षत्रचक्र सप्तकम्

६ नक्षत्राणि च कृत्तिकादिविहितान्यष्टाविंशतिः सप्तानि वै
आहितं नवकैस्त्रिभिः प्रतिबिम्बं दैवैस्त्वदन्त्यादिभिः
संसिद्धेऽपि सप्तविंशतिकं

[illegible]

पत्रव्यवहार

1 सोमेश्वर बने - गोकर्ण
2 मॅनेजर - सिंडिकेट बँक ,, - श्यामसुंदर गो.
3. न्यायाधीश - कारवार,
4 डेप्युटी कमिशनर . ,,
5 जि. प्राथ. कामत . ,,
6 एन. के. पै. कुमटा.
7. जि. प्राथ. पै. ,,
8 सिद्धारूढ मठ मठाधिस्वामी. ,,
9. जयवंत कोल - कुमटा.
10 रामजी शानभाग ,,
८ दिवाकरजी बेंगलोर.
9. धर्मवीर - ,,
10 चीफ मिनिस्टर. ,, वीरेन्द्र पाटील.)
11 रामकृष्ण हेगडे. ,,
12. डॉ सीताराम कुलवे.
13 प्रा. मा. कानकेरी हुबली - (जगद्गुरु गंगाधर - स्वामी मूरुसावीर मठ -
14 संयुक्त कर्नाटक. ,, डि. एस. सत्यदेव जिनेवा.)
15. अरविंद मोहनलाल. बॉम्बे. उमेशवर्मा पेरीस.
16 शान्ता [illegible]जी.
17. रामकृष्ण. भारतीय विद्याभवन. ,,
18. निजलिंगप्पा दिल्ली.
19 गुजराल ,,
20 प्रा. राय - ,,
21- नन्दाकिशोर. कार्णिकेरा.
22 श्रीमाली. काशी.
23 मदनगोपाल पोद्दार कलकत्ता.
24- [illegible] निजामनगर -